
पञ्चमः पाठः

# कर्मणा याति संसिद्धिम्



स च क्रुद्धस्तां व्यलोकयत्।

**लोकेशः** विशाखे! श्वः परीक्षा अस्ति। किं पुनरावृत्तिः कृता ?

**विशाखा** आम्। मया ते सर्वे पाठाः सम्यक् आवृत्ताः। अतः परीक्षाविषये निश्चिन्ता अस्मि।

**लोकेशः** सत्यम्! कर्मणा एव नरः सफलताम् आप्नोति। किं न पठिता कथासरित्सागरात् सङ्कलिता एषा कथा ?

**विशाखा** अद्य कक्षायाम् आचार्या पाठयिष्यति।

**लोकेशः** अहं तु सर्वदा गृहात् पूर्वमेव पठित्वा विद्यालयम् आगच्छामि। यत्र शङ्का भवति तत् शब्दं चिह्नितं करोमि।

**विशाखा** तर्हि वद, अस्मिन् चित्रे किमर्थम् एकः ऋषिः एका बलाका च चित्रिता ?

**लोकेशः** वदामि! ऋषिः क्रुद्धः भूत्वा बलाकां पश्यति, बलाका च दग्धा भूत्वा भूमौ पतति।

**विशाखा** अहो! ऋषेः तपसः प्रभावः।

**लोकेशः** परन्तु सेवायाः महत्त्वं तपसः अपि अधिकतरम्।

**विशाखा** पठामस्तावत् एतादृशीं ज्ञानवर्धनीं कथाम्।

पञ्चमः पाठः

# कर्मणा याति संसिद्धिम्

आसीत् पुरा कोऽपि महातपा नाम वनवासी मुनिः। एकदा यदा स तरुच्छायोपविष्ट आसीत्। तदा तस्योपरि एका बलाका विष्ठाम् उदसृजत्। स च क्रुद्धस्तां व्यलोकयत्। दृष्टमात्रा एव बलाका भस्मसाद् अभवत्। ततश्च स मुनिः तपःप्रभावाद् अहङ्कारम् उपगतः।

एकदा अयं मुनिः क्वापि नगरे एकं ब्राह्मणगृहं प्राप्य तद्गृहिणीं भिक्षामयाचत। सा पतिव्रता गृहिणी तमवदत्– ''प्रतीक्षस्व क्षणं, यावद् भर्तुः परिचर्यां समापये'' इति। एतत् श्रुत्वा स मुनिः तां कोपदृष्ट्या दृष्टवान्। सा विहस्य अभाषत– ''मुने! न अहं बलाकेति''। तत् आकर्ण्य विस्मितः मुनिः ''एतत् कथमिव ज्ञातमनया'' इति चिन्तयन् तत्र उपाविशत्।

ततश्च सा साध्वी भर्तुः शुश्रूषां कृत्वा भिक्षामादाय मुनेः अन्तिकम् आगता। स च मुनिः बद्धाञ्जलिः तामवदत् – ''कथं त्वया अनन्यगोचरो बलाकावृत्तान्तो ज्ञात इति ब्रूहि, ततो भिक्षां ग्रहीष्ये।'' साऽवदत् – ''मुने! न भर्तृसेवायाः अपरं कञ्चन धर्मं करोम्यहम्। तत्प्रसादेन एव मे एतादृशं विज्ञानम्। किञ्च इतः धर्मव्याधाख्यं कञ्चन मांसविक्रयिणं गत्वा एतत् पृच्छ। ततस्ते श्रेयो भविष्यति त्वं च निरहङ्कारः भविष्यसि इति''। एवं सर्वविदा पतिव्रतया अभिहितः गृहीतातिथिसत्कारः स मुनिः तां प्रणम्य तद्गृहाद् निरगच्छत्।

अन्येद्युः सः मुनिः समन्विष्य तं विपणिस्थं मांसानि विक्रीणन्तम् उपागच्छत्। धर्मव्याधश्च दृष्ट्वा एव तं मुनिम् अभाषत – ''ब्रह्मन्! किं पतिव्रतया तया इह त्वं प्रेषितः''? तत् आकर्ण्य स मुनिर्विस्मितः तं धर्मव्याधम् अवदत्– '' भद्र! मांसविक्रयिणः ते कथम् ईदृशं विज्ञानम्''? धर्मव्याधः अवदत्– ''ब्रह्मन्! अहं मातापित्रोर्भक्तः। तौ हि मम परायणम्। अहं तौ स्नापयित्वा स्नामि, भोजयित्वा भोजनं स्वीकरोमि। शाययित्वा च स्वपिमि। तेन मे एतादृशं विज्ञानम्। अन्यहतानां च मृगादीनां मांसानि स्वधर्म इति मत्वा वृत्त्यर्थं विक्रीणे, न तु धनलिप्सया। हे मुने! ज्ञानविघ्नोऽहङ्कारः। अतः स्वधर्मं चर, येन आशु परं श्रेयः अवाप्स्यसि''।

ततश्च धर्मव्याधेन एवम् अनुशिष्टः स मुनिः तद्गृहं गत्वा धर्मव्याधस्य च सर्वं क्रियाविधिम् अवलोक्य परितुष्टः वनं गतवान् अवाप्तवान् च तदुपदेशात् सिद्धिम्। उक्तञ्च

**कर्मणैव हि संसिद्धिम् आस्थिता जनकादयः।**

## शब्दार्थाः

| | | | |
|---|---|---|---|
| **अनन्यगोचरः**<br>(वि०) [न अन्यः अनन्यः (नञ् त० पु०) अनन्यस्य गोचरः (ष० त०)] | न कस्यचिदपि दृष्टिपथे आगतः | अन्य किसी के भी दृष्टि पथ से परे | not within the range of anyone's sight. |

| | | | |
|---|---|---|---|
| **अनुशिष्टः**<br>(वि०) [अनु+शास्+क्त, पुं० प्र०ए०व०] | उपदिष्टः | उपदेश दिया गया | instructed. |
| **अन्तिकम्** (अव्य०) | समीपम् | पास | near. |
| **अन्यहतानाम्**<br>(वि०) [पुं०,ष०ब०व०, अन्यैः हतानाम् तृ०त०पु०] | अन्यैः मारितानाम् | दूसरों के द्वारा मारे गयों का | of those killed by others |
| **अन्येद्युः**<br>(अव्य०) | अन्यस्मिन् दिने | किसी अन्य दिन | some other day, next day. |
| **अवलोक्य**<br>(अव्य०) [अव+लोक्+ल्यप्] | दृष्ट्वा | देखकर | after having seen. |
| **अवाप्तवान्**<br>(क्रि०) [अव+आप्+क्तवतु, पुं० प्र०ए०व०] | लब्धवान् | प्राप्त किया | obtained. |
| **अवाप्स्यसि**<br>(क्रि०) [अव+आप् लृट्, म० पु०, ए०व०] | प्राप्स्यसि | प्राप्त करोगे | will achieve. |
| **अहङ्कारमुपगतः**<br>(क्रि०) अहङ्कारम् उपगतः [उप+गम्+क्त, पु०प्र०ए०व०] | अभिमानं प्राप्तवान् | अहंकारी हो गया | became arrogant. |
| **आकर्ण्य**<br>(अव्य०)(आ+कर्ण्+ल्यप्) | श्रुत्वा | सुनकर | having heard. |
| **आशु**<br>(अव्य०) | शीघ्रम्, अचिरम् | जल्दी | soon. |
| **आस्थिताः**<br>(क्रि०) [आ+स्था+क्त, पु० प्र०ब०व०] | अधिगताः | (पूर्ण रूप से) प्राप्त किया | reached the stage of (acomplishment). |
| **उदसृजत्**<br>(क्रि०) [उत्+सृज्, लङ् प्र०पु०ए०व०] | विसृष्टवान् | छोड़ दिया | dropped. |
| **एत्य**<br>(क्रि०) (आ+इ+ल्यप्) | आगत्य | आकर | having reached. |
| **गृहीतातिथिसत्कारः**<br>(वि०)[अतिथेः सत्कारः (ष०त०पु०) गृहीतः अतिथिसत्कारः येन सः (ब०व्री०)] | स्वीकृतः अतिथिसत्कारः येन सः | वह जिसने अतिथिसत्कार को स्वीकार कर लिया है | one who has accepted the offerings as a guest. |

| | | | |
|---|---|---|---|
| **ग्रहीष्ये**<br>(क्रि०) [ग्रह्+लृट्, उ०पु०ए०व०] | ग्रहणं करिष्यामि | ग्रहण करूँगा | will accept. |
| **तरुच्छायोपविष्टः**<br>(वि०)[तरोः छाया तरुच्छाया (ष०त०पु०) तरुच्छायायाम् उपविष्टः (स०त०पु] | वृक्षस्य छायायाम् आसीनः | पेड़ की छाया में बैठे हुए | sitting under the shade of a tree. |
| **धनलिप्सया** (सं०)<br>[धनस्य लिप्सा तया (ष०त०)] | धनलोभेन | धन के लालच से | with greed of wealth. |
| **न्यगदत्**<br>(क्रि०) [नि+गद्+लङ्,प्र०पु०ए०व०] | अवदत् | बोला | said. |
| **परायणम्**<br>(सं०)(नपुं० ए० व०)[पर+अयनम्] | शरणम् | शरण | resort. |
| **परिचर्याम्**<br>(सं०) (स्त्री०, द्वि०ए०व०) | सेवाम् | सेवा को | service. |
| **प्रतीक्षस्व**<br>(क्रि०) [प्रति+ईक्ष्](आ०लो०म०पु०ए०व०] | प्रतीक्षां कुरु | इन्तजार करो | wait. |
| **प्रसादेन**<br>(सं०) [पु०तृ० ए०व०] | अनुग्रहेण / कृपया | कृपा से | by the grace. |
| **बलाका**<br>(सं०)(स्त्री०)[बलाक+टाप्, प्र०ए०व०) | बलाका–पक्षिविशेषः | बगला (मादापक्षी) | a sort of crane. |
| **ब्रूहि**<br>(क्रि०) [ब्रू, लो०, म०पु०ए०व०] | वद | बोलो | tell me. |
| **भोजयित्वा**<br>(अव्य०) [भुज्+णिच्+क्त्वा] | भोजनं कारयित्वा | भोजन कराकर | after serving the food. |
| **विक्रयिणम्**<br>(वि०) [विक्रय+इन्](पुं०द्वि०ए०व०] | विक्रेतारम् | बेचने वाले को | to a seller. |
| **विक्रीणन्तम्**<br>(वि०) (पुं०द्वि०ए०व०) [वि+क्री+शतृ] | विक्रयं कुर्वन्तम् | बेचते हुए को | to one who is selling. |

| | | | |
|---|---|---|---|
| **विपणिस्थम्**<br>(वि०) (पु०द्वि०ए० व०)[विपणौ तिष्ठति इति विपणिस्थ:, तम् उप०त०पु०] | आपणे तिष्ठन्तम् | दुकान में बैठे हुए को | to a person sitting in the shop. |
| **विष्ठाम्**<br>(सं०) (स्त्री०द्वि०ए०ब०) | मलम्, पुरीषम् | बीट को | excrement. |
| **विहस्य**<br>(अव्य०) [वि+हस्+ल्यप्] | हसित्वा | हँस करके | having laughed. |
| **वृत्त्यर्थम्**<br>(वृत्ति+अर्थम्) | जीविकार्थम् | जीविका निर्वाह के लिए | for livlihood. |
| **व्यलोकयत्**<br>(क्रि०) [वि +लोक् +लङ् प्र०पु०ए०व०] | अपश्यत् | देखा | saw. |
| **शाययित्वा**<br>(अव्य०) [शीङ् +णिच्+क्त्वा] | शयनं कारयित्वा | सुलाकर | after making them sleep. |
| **शुश्रूषाम्**<br>(सं०)(द्वि०ए०व०) | सेवाम् | सेवा को | service. |
| **श्रेय:**<br>(सं०) [नपुं० द्वि०ए० व०] | हितम्, कल्याणम् | कल्याण | virtue. |
| **संसिद्धिम्**<br>(सं०) (स्त्री० द्वि०ए० व०]<br>[सम्+सिध्+क्तिन्] [सम्यक् सिद्धि:; ताम्] | मोक्षम् | उत्तम सिद्धि को | accomplishment. |
| **समन्विष्य**<br>(अव्य०) [सम्+अनु+इष्+ल्यप्] | अन्वेषणं कृत्वा | खोजकर, ढूँढकर | having searched. |
| **साध्वी**<br>(सं०)(स्त्री०प्र०ए०व०)[साधु+ङीप्] | सुशीला, सुचरित्रा | सुन्दर आचरणवाली | lady a woman with good conduct. |
| **स्नापयित्वा**<br>(अव्य०)[स्ना+णिच्+क्त्वा] | स्नानं कारयित्वा | नहलाकर | after giving bath. |
| **स्वपिमि**<br>(क्रि०)(स्वप्+लट् उ०पु०ए०व०) | शयनं करोमि | सोता हूँ | sleep. |

# इदमपि जानन्तु

## सन्धियुक्तपदानि

| | | | | | |
|---|---|---|---|---|---|
| तरुच्छायोपविष्ट | = | तरु+छाया+उपविष्टः | क्रुद्धस्ताम् | = | क्रुद्धः+ताम् |
| ततश्च | = | ततः+च | करोम्यहम् | = | करोमि+अहम् |
| कञ्चन | = | कम्+चन | श्रेयो भविष्यति | = | श्रेयः+भविष्यति |
| गृहीतातिथिसत्कारः | = | गृहीत+अतिथिसत्कारः | मुनिर्विस्मितः | = | मुनिः+विस्मतः |
| वृत्त्यर्थम् | = | वृत्ति+अर्थम् | ज्ञानविघ्नोऽहङ्कारः | = | ज्ञानविघ्नः+अहङ्कारः |
| तदुपदेशात् | = | तत्+उपदेशात् | बद्धाञ्जलिः | = | बद्ध+अञ्जलिः |

## सन्धिकार्यम्

| | | | | | |
|---|---|---|---|---|---|
| दृष्टमात्रा+एव | = | दृष्टमात्रैव | मुनिः+ताम् | = | मुनिस्ताम् |
| तत्+आकर्ण्य | = | तदाकर्ण्य | गत्वा+एतत् | = | गत्वैतत् |
| येन+आशु | = | येनाशु | मांसविक्रयिणः+ते | = | मांसविक्रयिणस्ते |
| अतः+स्वधर्मम् | = | अतस्स्वधर्मम् | भर्तुः+शुश्रूषाम् | = | भर्तुश्शुश्रूषाम् |

## संयोगः

| | | | | | |
|---|---|---|---|---|---|
| भिक्षामयाचत | = | भिक्षाम्+अयाचत | ज्ञातमनया | = | ज्ञातम्+अनया |
| निरहङ्कारः | = | निर्+अहङ्कारः | भिक्षामादाय | = | भिक्षाम्+आदाय |
| तामवदत् | = | ताम्+अवदत् | सम्+अन्विष्य | = | समन्विष्य |

# अभ्यासः

1. **अधोलिखितानां प्रश्नानामुत्तराणि एकेन पदेन लिखत –**

(क) मुनिः कस्मात् कारणाद् अहङ्कारमुपगतः ? ..................................

(ख) मुनिः काम् भिक्षाम् अयाचत ? ..................................

(ग) साध्वी किम् आदाय मुनेः सकाशम् आगच्छत् ? ..................................

(घ) बलाकावृत्तान्तः कया ज्ञातः ? ..................................

(ङ) साध्वी किं धर्मकार्यं करोति स्म ? ..........................................

(च) सा मुनिं कस्य समीपे गन्तुम् अकथयत् ? ..........................................

(छ) धर्मव्याधः कस्य भक्तः आसीत् ? ..........................................

**2. अधोलिखितानां प्रश्नानामुत्तराणि पूर्णवाक्येन लिखत –**

(क) यदा मुनिः गृहिणीं भिक्षामयाचत तदा सा किम् अवदत् ?

..........................................................................................

(ख) मुनिः बद्धाञ्जलिः गृहिणीं किमवदत् ?

..........................................................................................

(ग) धर्मव्याधः दृष्ट्वैव तं मुनिं किमभाषत ?

..........................................................................................

(घ) धर्मव्याधेन मुनिः कथमनुशिष्टः ?

..........................................................................................

(ङ) कः ज्ञाने विघ्नं जनयति ?

..........................................................................................

(च) मुनिः कस्य उपदेशात् सिद्धिम् अवाप्तवान् ?

..........................................................................................

(छ) धर्मव्याधः किमर्थं मांसविक्रयणं करोति स्म ?

..........................................................................................

**3. अधोलिखितकथनेषु स्थूलपदानि आधृत्य प्रश्ननिर्माणं कुरुत –**

(क) पुरा **महातपा** नाम मुनिरासीत् ? ..........................................

(ख) **वृक्षस्य** उपरि बलाका आसीत्। ..........................................

(ग) क्रुद्धः मुनिः **बलाकाम्** अपश्यत्। ..........................................

(घ) मुनिः **ब्राह्मणगृहं** गत्वा भिक्षामयाचत। ..........................................

(ङ) ब्राह्मणी **भर्तुः** परिचर्याम् करोति स्म। ..........................................

(च) 'नाहं बलाका' इति **ब्राह्मण्या** कथितम्। ..........................................

(छ) धर्मव्याधः **मातापित्रोः** भक्तः आसीत्। ..........................................

(ज) **अहङ्कारेण** ज्ञानं नश्यति। ..........................................

**4. अधोलिखितप्रश्नान् यथानिर्देशम् उत्तरत –**

(क) 'आसीत् पुरा कोऽपि महातपा नाम वनवासी मुनिः।' अस्मिन् वाक्ये 'आसीत्' इति क्रियापदस्य कर्तृपदं किम्?

(ख) 'साध्वी भिक्षामादाय मुनेः अन्तिकम् आगता' अस्मिन् वाक्ये 'समीपे' इति पदस्य किं पर्यायपदं प्रयुक्तम्?

(ग) 'सः मुनिः बद्धाञ्जलिः तामवदत्।' अत्र 'बद्धाञ्जलिः' इति पदस्य विशेष्यपदं किम् अस्ति?

(घ) 'सा विहस्य अभाषत।' अस्मिन् वाक्ये क्रियापदं किम् ?

(ङ) 'स च क्रुद्धस्तां व्यलोकयत्।' अस्मिन् वाक्ये 'प्रसन्नः' इति पदस्य किं विलोमपदं प्रयुक्तम् ?

(च) 'गृहीतातिथिसत्कारः मुनिः तां प्रणम्य निरगच्छत्' अत्र 'मुनिः' पदस्य विशेषणपदं किम् ?

**5. उचितपर्यायपदैः सह मेलनं कृत्वा लिखत–**

| | | | |
|---|---|---|---|
| (क) उपगतः | ................................ | (i) | दृष्ट्वा |
| (ख) शुश्रूषाम् | ................................ | (ii) | नत्वा |
| (ग) आदाय | ................................ | (iii) | प्राप्तः |
| (घ) प्रणम्य | ................................ | (iv) | सेवाम् |
| (ङ) अवलोक्य | ................................ | (v) | स्वीकृत्य |

**6. विपरीतार्थकानां शब्दानां मेलनं कृत्वा लिखत–**

| | | | |
|---|---|---|---|
| (क) परितुष्टः | ................................ | (i) | चिरम् |
| (ख) आशु | ................................ | (ii) | आरभे |
| (ग) अन्तिकम् | ................................ | (iii) | आगत्य |
| (घ) गत्वा | ................................ | (iv) | असन्तुष्टः |
| (ङ) समापये | ................................ | (v) | दूरम् |

**7. अधोलिखितकथनानाम् आशयः समक्षं दत्तोऽस्ति। तत्र यत्सत्यमेकं तद् लिखत –**

(क) **न अहं बलाकेति।**

(i) त्वं मह्यं कथं क्रुध्यसि? मम नाम बलाका नास्ति। त्वं मम अनिष्टं कर्तुं कथमपि न पारयसि।

(ii) अहं पक्षी नास्मि यत् तव कोपेन भीता स्याम्। गच्छ त्वम् इतः शीघ्रम्।

(iii) अहं पतिव्रता नारी अस्मि। तव क्रोधदृष्टिः मां भस्मीकर्तुं न शक्नोति।

(ख) **मांसानि, स्वधर्म इति मत्वा वृत्त्यर्थं विक्रीणे, न तु धनलिप्सया।**

(i) मांसविक्रयणम् एव धर्मव्याधस्य धर्म आसीत्। सः स्वधर्मं श्रेष्ठं मन्यते। धनलोभात् सः सर्वं कार्यं करोति स्म।

(ii) धर्मव्याधः मांसविक्रयणं धर्मार्थं करोति। अनेन प्राप्तं सर्वं धनं दीनेभ्यः वितरति।

(iii) मांसविक्रयणं धर्मव्याधस्य स्वाभाविकं कर्म आसीत्। तेनैव जीविकानिर्वाहः भवति। सः धनमात्रलालसया मांसं न विक्रीणीते स्म।

(ग) ज्ञानविघ्नोऽहङ्कारः

(i) ज्ञानात् अहङ्कारः बाधकः जायते।

(ii) ज्ञानप्राप्तौ अहङ्कारः बाधकः भवति।

(iii) अहङ्कारे ज्ञानं विघ्नं करोति।

**8. विशेषण-विशेष्ययोजनम् -**

'क' स्तम्भे विशेषणपदानि सन्ति 'ख' स्तम्भे विशेष्यपदानि दत्तानि सन्ति। तयोः यथोचितं मेलनं कुरुत।

| | क | | ख |
|---|---|---|---|
| यथा- | वनवासी | | मुनिः |
| (क) | अनन्यगोचरः | (i) | बलाका |
| (ख) | सर्वविदा | (ii) | गृहिणी |
| (ग) | एका | (iii) | बलाकावृत्तान्तः |
| (घ) | ज्ञानविघ्नः | (iv) | पतिव्रतया |
| (ङ) | पतिव्रता | (v) | अहङ्कारः |

**9. अधोलिखितैः पदैः वाक्यानि प्रपूर्य कथासूत्रं योजयत-**

तरुच्छायायाम्, मुनिः, भस्मसाद् अभूत्, महातपा नाम, मुनेः,
विष्ठाम्, भिक्षाम्, प्रतीक्षस्व क्षणम्, विस्मितः, नाहं बलाकेति, क्रुद्धदृष्ट्या।

एकदा ........................ मुनिः ........................ उपविष्ट आसीत्। एका बलाका तस्योपरि ........................ उदसृजत्। सा बलाका ........................ क्रोधदृष्ट्या ........................। पुनः एकदा असौ ........................ एकां गृहिणीं ........................ अयाचत। पतिसेवारता सा अवदत् ........................। तदा मुनिः तां ........................ अपश्यत्। सा विहस्य अवदत् ........................। एतच्छ्रुत्वा मुनिः अतीव ........................जातः।

**10. कथाक्रमानुसारम् अधोलिखितानि वाक्यानि पुनः लिखत -**

(क) वृक्षस्य उपरि स्थिता बलाका तस्योपरि विष्ठाम् उदसृजत्।

(ख) एकदा असौ मुनिः ब्राह्मणगृहं गत्वा भिक्षाम् अयाचत।

(ग) ब्राह्मणी भर्तुः परिचर्यां करोति स्म।

(घ) पुरा महातपा नाम मुनिरासीत्।

(ङ) मुनिः तपःप्रभावात् अहङ्कारम् उपगतः।

(च) एतत् श्रुत्वा सः मुनिः तां कोपदृष्ट्या दृष्टवान्, परं न अहं बलाकेति तया कथितम्।

(छ) मुनेः दृष्टमात्रा एव सा बलाका भस्मसात् अभवत्।

(ज) प्रतीक्षस्व क्षणम् इति सा पतिव्रता गृहिणी तम् अवदत्।

## अन्वयः

1. **कर्मणैव हि संसिद्धिम् आस्थिता जनकादयः ।**

**अन्वयः** – जनक-आदयः कर्मणा एव संसिद्धिम् आस्थिता।

## योग्यताविस्तारः

**(क) ग्रन्थपरिचयः**

श्रीसोमदेवरचितः 'कथासरित्सागरः' पद्यात्मकः रोचकः प्रवाहमयः कथाग्रन्थः अस्ति। ग्रन्थेऽस्मिन् द्वाविंशति-सहस्रम् (22,000) पद्यानि सन्ति।

**(ख) भावविस्तारः**

कर्तव्यपालनम् एव सर्वोत्तमः धर्मः इति सारः अस्याः कथायाः। गीतायाम् अपि उक्तम्-

(i) अनाश्रितः कर्मफलं कार्यं कर्म करोति यः।
स संन्यासी च योगी च न निरग्निः न चाक्रियः॥

(ii) कर्मण्येवाधिकारस्ते०।

(iii) कर्मणैव हि संसिद्धिमास्थिता जनकादयः।
लोकसङ्ग्रहमेवापि संपश्यन् कर्तुमर्हसि॥ (3.20)

(iv) उपनिषदामपि आदेशः अस्ति- (क) मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव।

**(ग) भाषिकयोग्यता**

**अव्ययप्रयोगः**- परस्परं वाग्व्यवहारे अधोलिखितानाम् अव्ययानामपि प्रयोगः भवति, तेषामपि ज्ञानमावश्यकम्।

**(i) यत्र-तत्र** — **वाक्यप्रयोगः**

(i) नार्यस्तु पूज्यन्ते (ii) देवताः रमन्ते — **यत्र** नार्यस्तु पूज्यन्ते रमन्ते **तत्र** देवताः।

(i) जलं भवति (ii) वृक्षाः अपि भवन्ति। — **यत्र** जलं भवति **तत्र** वृक्षाः अपि भवन्ति।

**(ii) अत्र-तत्र पृथक् वाक्ये प्रयोगः**

(i) बालकाः पठन्ति (ii) बालिका लिखन्ति। — अत्र बालकाः पठन्ति, तत्र बालिकाः लिखन्ति।

**( iii )** **कदा**

(i) सः कदा पठति ?

(ii) त्वं कदा भ्रमसि ?

(iii) भवान् कदा विद्यालयं गच्छति ?

**( iv )** **कुतः**

(i) अशोकः कुतः आगच्छति ?

(ii) सुशीला कुतः आगमिष्यति ?

**( v )** **अधुना**

(i) अधुना अहं पठामि।

(ii) अधुना वसन्तकालः।

(iii) अधुना भोजनकालः।

**( vi )** **ह्यः**

(i) ह्यः रविवारः आसीत्।

(ii) ह्यः दीपावलिः पर्व आसीत्।

**( vii )** **श्वः**

(i) श्वः मम जन्मदिवसः भविष्यति।

(ii) श्वः मम मित्रम् आगमिष्यति।

**( viii )** **अद्य**

(i) अद्य अवकाशः अस्ति।

(ii) अद्य अहं गृहं गमिष्यामि।

## कोऽहं वदतु साम्प्रतम्

**स्वच्छाच्छवदनं लोकाः द्रष्टुमिच्छन्ति मे यदा।**
**तत्रात्मानं हि पश्यन्ति खिन्नं भद्रं यथायथम्॥**

**भावार्थः –** यदा जनाः मयि स्वच्छम् अतिनिर्मलं मुखं द्रष्टुम् इच्छन्ति, तदा ते यथा भवन्ति तथैव आत्मानं पश्यन्ति, यदि ते खिन्नाः सन्ति खिन्नान् पश्यन्ति, प्रसन्नाः सन्ति तर्हि आत्मानं प्रसन्नं पश्यन्ति।

## एहि हसाम

**पतिः** – (सद्यो विवाहितां पत्नीं प्रति) प्राणप्रिये! अहं तु विवाहात् पूर्वम् अतिचञ्चलः दुष्टश्च आसम्। किं भवती वदिष्यति – "भवती कथम् आसीत्?"

**पत्नी** – (लज्जया) स्वामिन्! यावद् वधूवरयोः गुणमेलनं न भवति तावत् तु विवाहः न भवति खलु।